# शोधनीतिप्रपत्रम्

(अनुमोदनीयम् )

## कर्नाटकसंस्कृतविश्वविद्यालयः

पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु – ५६००१८

### विषयः



| क्र.सं. | विवरणम् | पृष्ठसंख्या |
|---|---|---|
| 1. | प्रस्तावना | 3 |
| 2. | कर्नाटकसंस्कृतविश्वविद्यालयस्य उद्देश्यानि | 3 |
| 3. | कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधसम्बद्धाधिकाराः | 3 |
| 4. | शोधनीतिप्रपत्रस्य सम्बन्धः | 3 |
| 5. | शोधनीतिप्रपत्रस्य उद्देश्यानि | 4 |
| 6. | शोधस्य व्यापकक्षेत्रम् | 5 |
| 7. | शोधार्थं प्राथमिकताः प्रमुखक्षेत्राणि च | 6 |
| 8. | शोधार्थंसङ्कायाः विभागाश्च ( स्नातकोत्तराः , विद्यावारिधिः,विद्यावारिध्युत्तरशोधः) | 7 |
| 9. | शोधपरिषद् | 8 |
| 10. | शोधपरामर्शपरिषद् | 9 |
| 11. | अनुसन्धाननीतेः क्रियान्वयनतन्त्रम् | 9 |
| 12. | शोधार्थम् आचारसंहिता | 10 |
| 13. | सहमतिपत्रम् / सहमतिज्ञापनम्/ प्राधिकरणपत्रम् | 11 |
| 14. | विद्यावारिधेः कृते शोधपरामर्शसमितिः | 11 |
| 15. | शोधमार्गदर्शकत्वेन सङ्कायसदस्यस्य उत्तरदायित्वानि | 11 |
| 16. | शोधच्छात्रस्य उत्तरदायित्वानि | 12 |
| 17. | शोधोपाध्यर्थं क्रियमाणशोधाय विधानं प्रक्रियाश्च | 12 |



Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

**प्रस्तावना**

- **कर्नाटक**संस्कृतविश्वविद्यालयाधिनियमः 2009 इत्यस्य प्रस्तावनानुसारं कर्नाटकसंस्कृतविश्वविद्यालयः संस्कृते गुणवत्तापूर्णं शिक्षणमनुसन्धानञ्च स्थापयितुं समायोजयितुम् अपि च सर्वविधसमावेशिसंस्कृतगतिविधीनां विकासाय तत्सम्बद्धविषयांश्च प्रदातुं प्रयतते। **( के.सं.विवि. अधिनियमः)**
- 2009 तमवर्षात् संस्थानरूपेण आरब्धेन कर्नाटकसंस्कृतविश्वविद्यालयेन संस्कृतशास्त्रेषु भाषायां सम्बद्धक्षेत्रेषु च शोधमाध्यमेन संस्कृभाषायाः संस्कृतशिक्षायाश्च विकासे सततं योगदानं प्रदत्तम्। अत्यधिकसमृद्धभारतीयज्ञानप्रणालीनां प्रचारार्थं संरक्षणार्थञ्च च क्रियमाणेषु अनुसन्धानकार्येषु विस्तारगतिविधिषु च कर्नाटकसंस्कृतविश्वविद्यालयस्य महत्त्वपूर्णभूमिका परिलक्षिता भवति।
- कर्नाटकसंस्कृतविश्वविद्यालये कृतस्य गुणवत्तापूर्णानुसन्धानकर्मणः परिणामतः पुस्तकानां पत्रिकाणाञ्च बहुविधं प्रकाशनं जातम्। इदञ्च प्रकाशनं भारतस्य सर्वाधिकं प्राचीनं ज्ञानं प्राप्तुं तत्प्रसारार्थञ्च लाभप्रदं प्रासङ्गिकञ्च मन्यते।

**कर्नाटकसंस्कृतविश्वविद्यालयस्य उद्देश्यानि**

- कर्नाटकसंस्कृतविश्वविद्यालयाधिनियमः 2009 इत्यस्यानुसारं कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधसम्बद्धानि उद्देश्यानि निम्नलिखितानि भविष्यन्ति –
- संस्कृतभाषायाः अन्याध्ययनशाखानां संवर्धनार्थं यथोचितं शिक्षणम् अनुसन्धानम् अपि च विस्तारसौविध्यं प्रदाय ज्ञानस्य प्रसारः प्रचारश्च।
- शिक्षणाधिगमप्रक्रियायाम् अन्तःशास्त्रीयाध्ययने अनुसन्धाने च नवाचारान् विधातुमुपायकरणम् । संस्कृतस्य संस्कृतपारम्परिकविषयाणाञ्च क्षेत्रे जनानां शिक्षणं प्रशिक्षणं समग्रविकासः, संवर्धनं संरक्षणञ्च ।( **क.सं.वि. अधिनियमः** 2009)

**कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधसम्बद्धाधिकाराः**

कर्नाटकसंस्कृतविश्वविद्यालयस्य शोधसम्बद्धा अधोलिखिताधिकाराःभविष्यन्ति –

- संस्कृतस्य संस्कृतपारम्परिकविषयाणाञ्च तादृशज्ञानशाखानां यासां निर्धारणं विश्वविद्यालयद्वारा यथाकालं स्वीयनियमेषु करिष्यते तदर्थं निर्देशनप्रदानम्। अपि च तासां शाखानां ज्ञानप्रसारार्थम् अनुसन्धानार्थम् उन्नत्यर्थञ्च प्रावधाननिर्माणम् ।(**क.सं.वि. अधिनियमः** 2009)
- विश्वविद्यालयः यथा आवश्यकं मनुते तथा अन्यविश्वविद्यालयैः संस्थाभिः निकायैश्च सह अनुसन्धानार्थं मन्त्रणार्थं परामर्शसेवार्थं वा तादृग्व्यवस्थायै प्रावधाननिर्माणम्। (**क.सं.वि. अधिनियमः** 2009)
- विभिन्नविद्यास्थानेषु विभागेषु केन्द्रेषु च शिक्षणकर्मिणां संयुक्तनियोजनं विधाय अन्तर्विषयकानुसन्धानस्य संवर्धनम् ।(**क.सं.वि. अधिनियमः** 2009)

- विश्वविद्यालयस्य शैक्षणिकनीतीनां सामान्यपर्यवेक्षणम् अपि च शिक्षणविधीनां, महाविद्यालयानां संस्थानाञ्च मध्ये शिक्षणसमन्वयस्य शोधमूल्याङ्कनस्य शैक्षणिकमानकसंवर्धनस्य च सन्दर्भे निर्देशप्रदानम्। **(क.सं.वि. अधिनियमः** 2009)

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- शिक्षण-प्रशिक्षणानुसन्धानमानकानां संवर्धनार्थमुपायान्वेषणम् ।**(क.सं.वि. अधिनियमः** 2009)
- विश्वविद्यालयस्य उत्कृष्टताक्षेत्रस्य निर्धारणम् अनुसन्धानार्थञ्च महत्त्वपूर्णक्षेत्राणामभिज्ञानम् । **(क.सं.वि. अधिनियमः** 2009)
- **शोधनीतिप्रपत्रस्य सम्बन्धः**
- कर्नाटकसंस्कृतविश्वविद्यालये अनुसन्धाने उत्कृष्टतायाः प्रासङ्गिकतायाश्च गवेषणपरिणामः प्राप्यते । अतः उच्चतममानकेषु अनुसन्धानं सञ्चालयितुं शोधनीतिप्रपत्रमिदं समुचितोत्तमशोधप्रथानां विषये मार्गदर्शनं विदधाति ।
- शोधनीतिप्रपत्रस्य उद्देश्यं विश्वव्यापिमानकानुसारं विशिष्टानुसन्धानसमूहानां संघटनं विधाय अनुकूलानुसन्धानसंस्कृतेः पारिस्थितिकीतन्त्रस्य च स्थापनं वर्तते ।
- शोधनीतिप्रपत्रमिदं वैश्विकसमाजस्य अध्ययनहिताय शोधनिष्कर्षान् प्रयोक्तुं प्राथमिकतां प्रयच्छति ।
- इदं प्रपत्रं शैक्षणिकमानकानां नैतिकतायाश्च पालयित्रीं शोधसंस्कृतिम् आरभते तत्संवर्धनञ्च कुरुते ।
- अस्य प्रपत्रस्य उद्देश्यं विस्तृतानुसन्धानगतिविधीनां संवर्धनं शोधसम्बद्धकार्यनीतेः प्रदानं वर्तते ।
- प्रपत्रमिदं सैद्धान्तिकज्ञानस्य परिणामेषु क्रियान्वयनं विधातुमवसरं प्रयच्छति अपि च प्रपत्रसिद्धान्तानाम् अनुप्रयोगाधारेण अनुसन्धानार्थं मार्गं प्रदर्शयति ।
- इदं प्रपत्रम् अन्यशासकीयाशासकीयवित्तपोषिताभिकरणानां सहयोगं शोधपरियोजनानां संवर्धनाय वाञ्छति ।
- प्रपत्रमिदं भारतीयानुसन्धानपद्धत्याधारितं शोधकार्यं संवर्धयति ।
- प्रपत्रमिदं भारतीयशास्त्राणां नूतनायामानां गवेषणं विदधाति अपि च भारतीयशास्त्राणाम् औपनिवेशिकव्याख्यानाम् आलोचनामुन्नयति ।

**शोधनीतिप्रपत्रस्य उद्देश्यानि**

- व्यूहात्मक-प्राविधिक-परिचालनात्मकस्तरेषु सर्वेषां विश्वविद्यालयानुसन्धानगतिविधीनां योजनार्थम् आयव्ययार्थं नियन्त्रणार्थञ्च संस्थागतक्षमतानां संवर्धनम् ।
- संकायसदस्यानां छात्राणाञ्च शोधपरियोजनासु उपक्रमेषु च साहाय्यार्थं सौविध्यप्रदानार्थञ्च पर्याप्तशोधनिधेः स्थापनं प्रबन्धनञ्च ।
- अनुसन्धानार्थं धनवितरणे पुरस्कारस्थापने इतरेषु सर्वेषु च कार्येषु साहाय्यार्थं नीतीनां विधीनां मानकानाञ्च निर्माणम् ।
- स्वीयोद्देश्यैः दृष्ट्या च सह अन्ताराष्ट्रियविकासलक्ष्यानुरूपं विधातुं विश्वविद्यालये सर्वविधशोधप्रयासानां समुचितरूपेण समन्वयार्थं व्यवस्थाप्रदानम् ।
- विश्वविद्यालयस्य शोधकार्यसूचीं निर्मातुं तत्स्थिरीकरणार्थञ्च प्रमुखसमुचितक्षेत्रेभ्यो वित्तपोषितशोधपरियोजनाभ्यश्च सर्वोच्चप्राथमिकतायाः रूपरेखानिर्माणम् ।
- पाठ्यक्रमस्य नियतवितरणे तत्संवर्धने च अनुसन्धानपरियोजनानाम् एकीकरणस्य तत्प्रयासेषु संकायसदस्यानां मार्गदर्शनम् ।
- नियतपाठ्यक्रमस्य क्रियान्वयनेन पाठ्यचर्याविकासगतिविधिभिः सह प्रभावपूर्णासु एकीकृतशोधपरियोजनासु संकायसदस्यानां मार्गदर्शनम् ।

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- समधिकज्ञानक्षेत्रेषु तादृशपरियोजनासु च बाह्याभिकरणानि विशेषज्ञांश्च सम्मेलयितुं नीतिसम्मेलनपुरस्सरं संयुक्तानुसन्धानपरियोजनानां सज्जीकरणाय सञ्चालनाय च अन्तःशास्त्रीयानुसन्धानस्य संवर्धनं रूपरेखानिर्माणञ्च।
- विश्वविद्यालयेषु शिक्षकेभ्यः छात्रेभ्यश्च समुपलब्धशोधावसराणां वित्तपोषणविकल्पानाञ्च क्षेत्रप्रसारार्थं राष्ट्रियैः अन्ताराष्ट्रियैश्च शोधसङ्घटनैः सह दीर्घकालिकसम्बन्धान् स्थापयितुं सहमतिज्ञापनेन / प्राधिकरणपत्रेण सह सम्बन्धस्याभिज्ञानं संस्थापनञ्च।
- प्रतिष्ठितशैक्षणिकपत्रिकासु शोधकार्याणां परियोजनानाञ्च प्रकाशनार्थं प्रोत्साहनं सौविध्यप्रदानञ्च।
- शैक्षणिककर्मचारिणः शिक्षणानुसन्धानपरामर्शपरिणामानां वाञ्छितमिश्रणं प्राप्नुयुः यद्द्वारा विश्वविद्यालयस्य लक्ष्ये निर्धारितस्तरः प्राप्तुं शक्येत इति विनिश्चेतुं तन्त्रप्रदानम्।
- विश्वविद्यालयस्य सर्वेऽपि शोधगतिविधयः मानकगुणवत्ताविनिर्देशानुरूपाः स्युरिति विनिश्चेतुं शोधगुणवत्ताऽऽश्वासनतन्त्रस्य सज्जीकरणम्।
- शोधगुणवत्ताऽऽश्वासनरूपरेखायाः शोधकूटस्य सर्वविधप्रवर्तमाननियमानाम् अधिनियमानाञ्चानुपालनं शोधकर्तृभ्यः सुनिश्चेतुं नियमानां प्रक्रियाणाञ्च विकासः प्रशासनञ्च।

**शोधस्य व्यापकक्षेत्राणि**

1. **शोधपरियोजनाः**

- मूलधनसम्बद्धप्रावधानानि राष्ट्रियान्ताराष्ट्रियमहत्त्वस्य महत्त्वपूर्णक्षेत्रेषु प्रतिस्पर्धिशोधपरियोजनायाः प्रोत्साहनं विधास्यन्ति। मूलधनस्यानुदानेन नवीनविचाराणां ज्ञानस्य च संवर्धनं भविष्यति अपि च शोधपरियोजनानां सञ्चालने सौविध्यं भविष्यति याः बाह्यानुदानमाध्यमेन स्वीयस्रोतांसि सम्भावितरूपेण विकासयिष्यन्ति।
- शोधपरियोजनार्थं भौतिकव्यवस्थायाः प्रदानं (यत्र सौविध्यं संसाधनानि सेवाश्च सम्मिलितानि) वित्तपोषणञ्च कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानकार्यालयदिल्लीद्वारा करिष्यते। प्रावधानानि शोधपरियोजनानां सञ्चालनाय संस्कृतस्य संस्कृतशिक्षायाश्च क्षेत्रे नवाचारान् संवर्धयितुं संरचयिष्यन्ते।
- शोधसंस्कृतौ शोधपरियोजनासु च सौविध्यं कल्पयितुं कर्नाटकसंस्कृतविश्वविद्यालयस्य प्रधानकार्यालयदिल्लीद्वारा सर्वविधं प्राशासनिकं साहाय्यं विधास्यते।

2. **शोधप्रकाशनानि**

- विश्वविद्यालयः संस्कृतस्य अन्यसम्बद्धविषयाणां क्षेत्रे गुणवत्तापूर्णपत्रिकाणां मुद्रणं सद्यस्कप्रकाशनञ्च संवर्धयिष्यति।
- विश्वविद्यालयः प्रसिद्धानां विदुषां लेखकानाञ्च दुर्लभप्रकाशनानां पुनःप्रकाशनेऽपि आर्थिकरूपेण साहाय्यं करिष्यति।
- विश्वविद्यालयः उच्चानुक्रमितगुणवत्तापूर्णपत्रिकासु गुणवत्तापूर्णशोधपत्राणि प्रकाशयितुं सङ्कायसदस्यानां प्रोत्साहनं सक्रियाभिप्रेरणञ्च विधास्यति।
- संस्कृतज्ञानपरम्पराणां सम्बन्धे गुणवत्तापूर्णशोधं प्रस्तोतुं सम्मेलनेषु सङ्गोष्ठीषु च भागं ग्रहीतुं संकायसदस्येभ्यः आर्थिकसहयोगः प्रदास्यते।
- विश्वविद्यालयः विशेषतः वैज्ञानिकानुसन्धानपद्धतिसम्बद्धानां विशिष्टपरिणामोत्पादकानाञ्च अन्तःशास्त्रीयबहुशास्त्रीयशोधप्रकाशनानां प्रशंसनं समर्थनं संरक्षणञ्च विधास्यते।

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

3. **बौद्धिकसम्पदधिकारः (IPR)**

- प्रपत्रमिदं भारतशासनद्वारा स्वीकृतस्य व्यापकविषयस्य 'सर्जनात्मकभारतं नवाचारभारतम्' इत्यस्यानुसारं विश्वविद्यालये गतिशीलां सजीवां सन्तुलितबौद्धिकाधिकारप्रणालीं प्रोत्साहयति।
- नीतिप्रपत्रमिदं रचनात्मकतां नवाचारान् उद्यमितां सामाजिकसांस्कृतिकार्थिकविकासञ्च संवर्धयिष्यति । अपि च संस्कृतज्ञानपरम्परायाः इतरक्षेत्रेषु योगायुर्वेदस्वास्थ्यसततविकासेषु महत्त्वपूर्णसामाजिकार्थिक-प्राविधिकविकासक्षेत्रेषु च उन्नयनार्थम् अधिकावधानं करिष्यति।
- विश्वविद्यालयः इदं निश्चेष्यति यद् बौद्धिकसम्पदधिकारः शोधकर्त्रे तदीयबौद्धिकरचनार्थं प्रदत्तो विधिसम्मतोऽधिकारो वर्तते। शोधकर्त्रे निश्चितकालाय तदीयरचनोपयोगे विशेषाधिकारः प्रदास्यते।
- विश्वविद्यालयः एकं महत्त्वपूर्णं पारिस्थितिकीतन्त्रं निर्मास्यते यच्च नवाचारान् संवर्धयितुं महत्त्वपूर्णं वर्तते। विचाराणां संरक्षणं विना शोधकार्यं नवाचाराणां पूर्णतः लाभं स्वीकर्तुं नार्हति अपि च अनुसन्धाने विकासे च न्यूनमवधानं करिष्यति।

4. **पाण्डुलिपीनां भाण्डारः**

- बौद्धिकसम्पदधिकारत्वेन एकस्वाधिकारत्वेन (पेटेंट) च प्राप्तानां पाण्डुलिपीनाम् अंशनं एकत्रीकरणं क्रयणं अङ्कीकरणं स्वीकरणञ्चेति सर्वाणि कार्याणि प्रयागराजस्थगङ्गानाथझापरिसरे सम्पादयिष्यन्ते।
- पाण्डुलिपीनां निभालनं संरक्षणञ्च संरक्षणनियमानुसारं विचारणीयं भविष्यति।
- पाण्डुलिपयः वैद्युतीयरूपेण अङ्कीकृताः भविष्यन्ति अपि च शोधकर्तृभ्यः सङ्कायसदस्येभ्यश्च धनाधारेण समुपलब्धाः भविष्यन्ति।
- विश्वविद्यालयद्वारा प्रदत्तेन धनेन पाण्डुलिपीनां सङ्कलनं संरक्षणञ्च विधास्यते।

5. **विभिन्नकार्यक्रमेषु अनुसन्धानम्**

- विश्वविद्यालयः विभिन्नस्तरेषु स्नातक-स्नातकोत्तर-शोध-विद्यावारिध्युत्तरस्तरेषु विश्वविद्यालयद्वारा प्रदीयमानविभिन्न-कार्यक्रमेषु गुणवत्तापूर्णानुसन्धानं संवर्धयितुं प्रतिबद्धो वर्तते।
- अनुसन्धाने गुणवत्तां सुनिश्चेतुं विश्वविद्यालयस्य सकाशे उपर्युक्तकार्यक्रमाणां कृते विस्तृतमार्गदर्शिका भविष्यति।
- विश्वविद्यालयानुदानायोगस्य अन्यनियामकनिकायानां निर्देशानुसारं सज्जीकरिष्यते।

**अनुसन्धानाय प्राथमिकताः प्रमुखक्षेत्राणि च**

- कर्नाटकसंस्कृतविश्वविद्यालयः सम्बद्धानां विभिन्नसंस्थागतसमितीनाम् अन्यसम्बद्धपरिषदाञ्च परामर्शेन अनुसन्धानस्य प्राथमिकतानां प्रमुखक्षेत्राणाञ्च अभिज्ञानं करिष्यते।एषु क्षेत्रेषु अनुसन्धानमारब्धुं समुपलब्धसौविध्यस्य वित्तस्य छात्रवृत्तेः प्रोत्साहनस्य अध्येतावृत्तेः मूलभूतस्वरूपस्य च समुपलब्धताविवरणेन सह अनुसन्धानस्य प्राथमिकतायाः प्रमुखक्षेत्राणाञ्च व्यवस्थिततरूपेण सञ्चालनस्य आवश्यकता वर्तते।
- कर्नाटकसंस्कृतविश्वविद्यालयः अनुसन्धानपरियोजनानां प्रकाशनानां बौद्धिकसम्पदधिकारस्य पाण्डुलिपिभाण्डारस्य च सन्दर्भे प्राधान्येन अनुसन्धानं विधातुं प्रयतिष्यते।

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- अनुसन्धानं विधातुम् अधोलिखितप्राथमिकताः प्रमुखक्षेत्राणि च वर्तन्ते , अपि च काले –काले इमे विषयाः समीक्षणीयाः भविष्यन्ति –

1. **पाण्डुलिपीनां सम्पादनं समालोचनात्मकसंस्करणानाञ्च सज्जीकरणम् ।**
    - सम्पादनसिद्धान्तानां नियमानाञ्चानुसारं समालोचनात्मकं सम्पादनम् ।
    - प्रकाशितानाम् अप्रकाशितानाञ्च पाण्डुलिपीनां समालोचनात्मकं समीक्षणम् ।
    - समुपलब्धैकप्रतिलिपिपाण्डुलिपेः आलोचनात्मकसंस्करणस्य सज्जीकरणम् ।
    - संस्कृते हिन्द्याम् आङ्ग्ले इतरभाषासु चानुवादेन सह विशेषसंस्करणम् ।
    - बौद्धिकसम्पदधिकारत्वेन एकस्वाधिकारत्वेन (पेटेंट) च प्राप्तानां पाण्डुलिपीनाम् अंशनं सङ्कलनं क्रयणम् अङ्कीकरणं स्वीकरणञ्चेति सर्वाणि कार्याणि प्रयागराजस्थगङ्गानाथझापरिसरे सम्पादयिष्यन्ते ।
2. **भारतीयज्ञानपरम्पराः तासामनुप्रयोगश्च**
    - भारतीयज्ञानपरम्परासु सर्वाधिकसमृद्धपरम्पराणां सन्दर्भे समसामयिकसमस्यासु आह्वानेषु विषयेषु च अनुसन्धानम् ।
    - भारतीयज्ञानपरम्परासम्बद्धानि कानिचन मौलिकानि वैज्ञानिकानि च शोधकार्याणि विभिन्नक्षेत्रेषु संलग्नानां नूतनसिद्धान्तानां निरूपणात्मकानि अपेक्ष्यन्ते ।
    - भारतीयज्ञानपरम्पराया एभिर्विषयैः क्षेत्रैश्च सह सहसम्बन्धात्मकाध्ययने केन्द्रितमनुसन्धानम् ।
    - प्राच्येतिहास-पुरातत्त्व-सङ्ग्रहालयविज्ञान-वैदिककृषि-चिकित्सापरम्परा-स्वास्थ्यसंरक्षणादिभिश्च सम्बद्धमनुसन्धानं कर्नाटकसंस्कृतविश्वविद्यालयस्य सर्वोच्चप्राथमिकता वर्तते ।
    - अन्यशास्त्रसम्बद्धे कस्मिंश्चिदपि विषये संस्कृतज्ञानपरम्परासम्बद्धशाखासु च अन्तःशास्त्रीयं बहुशास्त्रीयञ्चानुसन्धानम् ।
    - संस्कृतभाषायाः आलोचनात्मकं व्याख्यानविश्लेषणम् – अन्तःशास्त्रीयानुसन्धानगत्याधारितम् अन्यभारतीयभाषाभिः वैदेशिकभाषाभिश्च सह संस्कृतभाषायाः विश्लेषणम् ।
    - सूचनासम्प्रेषणप्रविध्याधारितविषयाः क्षेत्राणि च – सङ्गणकीयभाषाविज्ञानम् , पारम्परिकाध्ययनम्, प्राकृतिकभाषाप्रक्रिया प्रविधिप्रयोगाधारितानुसन्धानञ्चेति । संस्कृतशिक्षणार्थं प्राविधिकसंसाधनानां विकासः, संस्कृतज्ञानपरम्परायाः अधिगमार्थं तदिष्टतमोपयोगार्थञ्च उपकरणानां तन्त्रांशानाञ्च विकासः ।
3. **भारतीयज्ञानपरम्पराणां समालोचनायाः समीक्षा**
    - भारतीयशास्त्रीयसाहित्यस्य समीक्षा ।
    - औपनिवेशिकदृष्टिकोणैः प्रदर्शितस्य सिद्धान्तनिर्माणस्य प्रचारस्य च मूल्याङ्कनम् ।
    - आधुनिकटीकाकारैः विद्वद्भिश्च पूर्वप्रकाशनानां प्रचाराणाञ्च समालोचना ।
4. **ऐतिहासिकं वर्णनात्मकं प्रायोगिकञ्चानुसन्धानम्**
    - शैक्षिकानुसन्धानस्य मुख्यकेन्द्रबिन्दुत्वेन राष्ट्रियशिक्षानीतिः 2020 भवेत् । शैक्षिकानुसन्धानस्य क्षेत्राणि राष्ट्रियपाठ्यचर्यायाः रूपरेखात्वेन, नूतनपाठ्यचर्यात्वेन, शिक्षणशास्त्रप्रयोगत्वेन, शिक्षणाधिगमकार्यवृद्धित्वेन च स्वीकर्तुं शक्यन्ते यानि च साक्षाद् राष्ट्रियशिक्षानीत्या (2020) सम्बद्धानि वर्तन्ते ।

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- शैक्षिकानुसन्धानं मातृभाषामाध्यमं प्रति गतिशीलप्रतिमानैः सह अवश्यं सम्बद्धं स्यात् । शिक्षणाधिगमप्रथासु अस्य प्रभावः संस्कृतशिक्षायां नूतनसम्भावनाः नवाचारांश्च जनयति ।
- ऐतिहासिकशैक्षिकानुसन्धानं प्राचीनभारतीयेतिहासेन भारतस्य शैक्षिकप्रणाल्या च सम्बद्धं भवेत् । आसां शैक्षिकघटनानामध्ययनार्थं गुणात्मकशोधपद्धतिः स्वीकर्तव्या ।
- वर्णनात्मकसर्वेक्षणाधारितशोधद्वारा सामाजिकसांस्कृतिकपक्षान् अवगन्तुं संस्कृतस्य संस्कृतशिक्षायाश्च प्रवृत्तौ आह्वानेषु समस्यासु विषयेषु च अवधानं दत्तम् ।
- प्रायोगिकशैक्षिकानुसन्धानं मानविकीविषयस्य विज्ञानविषयस्य च शिक्षणपद्धतिभिः विशेषतःभारतीयविधिभिः शिक्षणेन सम्बद्धं भवेत् । एवमेव भारतीयशोधपद्धतीनां विकासाय कानिचिदध्ययनानि प्रोत्साहनीयानि अनुशंसनीयानि समर्थनीयानि च ।

**अनुसन्धानार्थं विद्यास्थानानि विभागाश्च ( स्नातकोत्तरस्तरः /शोधस्तरः/ विद्यावारिध्युत्तरस्तरः)**

**वेदनिकायः** – वेदः, पौरोहित्यम्, वेदाङ्गानि, वेदभाष्यञ्च

**भाषानिकायः** – संस्कृतम्, साहित्यम्, पुराणेतिहासः, आङ्ग्लम्, भारतीयभाषाः, कन्नड नाट्यशास्त्रम् )

**शास्त्रनिकायः** – अलङ्कारशास्त्र, धर्मशास्त्रम्, व्याकरणशास्त्रम्, ज्योतिषशास्त्रम्, न्यायवैशेषिकशास्त्र, मीमांसाशास्त्रम्, साङ्ख्ययोगदर्शनम्

**वेदान्तनिकायः** – द्वैत-अद्वैत-विशिष्टाद्वैत-शक्तिविशिष्टाद्वैतदर्शनानि, बौद्ध-जैनदर्शनम्

**शिक्षाशास्त्रनिकायः**

**प्राचीनभारतीयविज्ञाननिकायः** - सामाजिकविज्ञानम्, राजनीतिविज्ञानम्, अर्थशास्त्रम्, इतिहासः, समाजशास्त्रम्, भूगोलम्, अन्यशास्त्राणि च, वाणिज्यम्, व्यापारः लोकप्रशासनञ्च, यौगिकविज्ञानम् अध्यात्मञ्च, आयुर्वेदः प्राकृतिकचिकित्सा च)

अनुसन्धानस्य विशिष्टविषयेषु विश्वविद्यालयभिन्नानाम् अन्यविद्यास्थानानां सहयोगिसंस्थाभिः सह परस्परसहमतिज्ञापनाधारेण अनुमोदनं भवितुमर्हति ।

**केन्द्रीयशोधमण्डलम्**

प्रत्येकेन अनुसन्धात्रा प्रस्तुतः शोधप्रस्तावः पर्यवीक्षितो भविष्यति । साक्षात्कारमाध्यमेन अनुसन्धातुः प्रस्तुतेः परीक्षणं पञ्जीकरणम् अनुसंशनं शोधकार्यार्थं शोधदलेन करिष्यते । तस्मिन् शोधदले अधोलिखिताः सदस्याः भविष्यन्ति –

- कुलपतिः — अध्यक्षः
- सर्वनिकायप्रमुखाः — सदस्याः
- सर्वनिकायप्रमुखव्यतिरिक्ताः पञ्च आचार्याः — सदस्याः
- अन्यविश्वविद्यालयेभ्यः /अन्यसंस्थाभ्यः पञ्च बाह्यविशेषज्ञाः (कुलपतिना चेतव्याः) — सदस्याः
- परीक्षानियन्त्रकः — सदस्यः

V. [signature]

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018 Ph: 080-26705387

- एकः निदेशकः (कुलपतिना चेतव्यः) — सदस्यः
- कुलचिवः — सदस्यः
- अध्ययनाङ्गनिदेशकः — सदस्यसचिवः

**केन्द्रीयशोधमण्डलस्य भूमिका उत्तरदायित्वञ्च**

- विश्वविद्यालयस्य शोधनीत्यभिलेखानां सज्जीकरणम्।
- विद्वत्परिषदा प्रदत्तस्य शोधक्षेत्रस्य सज्जीकरणम्, यस्मिन् बृहतीनां लघ्वीनां परियोजनानां परामर्शस्य अथवा अन्यशोधगतिविधीनां समावेशो भविष्यति।
- शोधप्रस्तावानां पुनरीक्षणं शोधशीर्षकस्य चरमस्वीकृतिः।
- स्वक्षेत्राधिकारे शोधस्य प्रमुखक्षेत्राणां निर्धारणम्।
- विश्वविद्यालयेन राष्ट्रियैः /अन्ताराष्ट्रियाभिकरणैर्वा वित्तपोषणाय सांस्थानिकशोधकार्यक्रमाणां मूल्याङ्कनम्।
- अन्तर्वैषयिक – बहुवैषयिकशोधकार्याणां सम्पादनं प्रोन्नतिश्च । एतेषां शोधकार्याणां कृते विश्वविद्यालयस्तरे / राष्ट्रियस्तरे / अन्ताराष्ट्रियस्तरे वित्तपोषणम्।
- प्रत्येकविभागे शोधस्य वर्तमानस्थितेः पुनरीक्षणं शोधावधौ वित्तपोषणस्य प्रगतेश्च मूल्याङ्कनं, समये-समये प्रगतेः समीक्षात्मकं परीक्षणम्।
- विशेषतया विश्वविद्यालयस्य भूमिकायाः उत्तरदायित्वस्य च सन्दर्भे विभागेषु शोधस्य प्रधानक्षेत्राणामिङ्गनं विश्वविद्यालये उपलब्धानां सौविध्यानां विषये विचारः अपि च सम्बद्धविभागेभ्यः स्वीकृतानां प्रमुखशोधक्षेत्राणामालोके आवश्यकतानुगुणं सौविध्यसर्जनं सङ्कायसदस्यानां वैयक्तिकरुचेः उपरि विचारः।
- विद्वत्परिषदा नियतानां तथाविधान्यकार्याणां सम्पादनम्।
- यदि शोधच्छात्रस्य प्रगतिः असन्तोषकरी स्यात्तर्हि शोधमण्डलं तस्याः कृते कारणानि दर्शयिष्यति एवं संशोधनोपयान् निर्देक्ष्यति।
- यदि शोधच्छात्रः एतेषां दोषापनयनोपायानां कार्यान्वये विफलः स्यात्तर्हि शोधमण्डलं तस्य पञ्चीकरणस्य निरसनाय सतर्कं परिसराय संस्तोष्यति।

**केन्द्रीयशोधमण्डलस्य सौविध्यानि**

- केन्द्रीयशोधमण्डलं प्रतिवर्षं न्यूनातिन्यूनं वारद्वयं सततमुपवेक्ष्यति।
- केन्द्रीयशोधमण्डलोपवेशनाय सप्तानां सदस्यानामुपस्थितिः गणपूर्तिं करिष्यति।
- अधिनियमैः नियतानां कर्तव्यानां कार्याणाञ्च निर्वहणम्।
- उपर्युक्तेषु वाक्यखण्डेषु यदि विसङ्गतयः स्युस्तर्हि तासां समाधानाय कुलपतौ शक्तिराधीयते।

**केन्द्रीयशोधमण्डलस्य स्थायिनी समितिः**


- कुलपतिः — अध्यक्षः
- सर्वनिकायप्रमुखाः — सदस्याः
- सर्वनिकायप्रमुखव्यतिरिक्ताः पञ्च आचार्याः — सदस्याः

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018 Ph: 080-26705387

- अन्यविश्वविद्यालयेभ्यः /अन्यसंस्थाभ्यःपञ्च बाह्यविशेषज्ञाः (कुलपतिना चेतव्याः) सदस्याः
- परीक्षानियन्त्रकः सदस्यः
- एकः निदेशकः (कुलपतिना चेतव्यः) सदस्यः
- कुलचिवः सदस्यः
- अध्ययनाङ्गनिदेशकः सदस्यसचिवः
- स्थायिन्या समित्या कृतानां निर्णयानां संशोधनं केन्द्रीयशोधमण्डलद्वारा करिष्यते।
- यस्मिन् सन्दर्भे कुलपतिः सभायाः अध्यक्षतां न करिष्यति तस्मिन् सन्दर्भे शोधसङ्कायप्रमुखः अध्यक्षतां निर्वक्ष्यति।

**शोधपरामर्शपरिषद्**

- अनुसन्धानविकाससन्दर्भे विश्वविद्यालयानुदानायोगस्य अभिलेखानुसारेण कुलपतेः अध्यक्षतायाम् अनुसन्धानपरामर्शपरिषदः संघटनं क्रियते, या केन्द्रीयशोधमण्डलसमा वर्तते।
- अनुसन्धानविकासप्रकोष्ठस्य संघटनं निम्नलिखिताभिः समितिभिः करिष्यते।




**अनुसन्धाननीतेः कार्यान्वयनतन्त्रम्**

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- विश्वविद्यालयस्य केन्द्रीयशोधमण्डलं, विश्वविद्यालयप्रबन्धनेन विभिन्नस्तरेषु अन्यसमितिभिश्च सह संयुज्य कार्यं कृत्वा अस्याः शोधनीतेः अभिलेखस्य क्रियान्वयने दायित्वभाग् भविष्यति । शोधसङ्कायप्रमुखोऽस्य अभिलेखस्य कार्यान्वयननिर्धारणं करिष्यति। निम्नलिखितरूपेण नीतेः क्रियान्वयनं कर्तुं कानिचित् तन्त्राणि सन्ति-
- संकायसदस्यैः अनुसन्धानाय सौविध्यप्रदानं तथा प्रारम्भिकधनप्रदानाय एकस्य अनुसन्धानवित्तकोषस्य स्थापनाय च विश्वविद्यालयप्रबन्धनेन सह कार्यकरणम् ।
- भारतीयज्ञानसम्पदां परम्पराणां प्रणालीनाञ्च क्षेत्रे कार्यरतानां संस्थानां सहयोगप्रदानम् ।
- वैश्विकज्ञानसमाजस्य समकालिकावश्यकतानुसारेण प्रकाशितानां शोधकार्याणाञ्च पुनःप्रकाशनाय परियोजनानिर्माणम्।
- शिक्षायाः केनचिदपि विद्याक्षेत्रेण असम्बद्धानाम् आजीवनाभ्यासद्वारा ज्ञानकोषसुरक्षाकर्तॄणां विदुषां मार्गदर्शनं, समर्थनं पर्यवेक्षणञ्च प्राप्तव्यम् ।
- शास्त्राणां तेषां गूढार्थानाञ्च व्याख्यां स्थापयितुं, पाश्चात्त्यविदुषाम्, इतिहासकाराणाम्, उत वा प्राच्यविदुषाम्, इतिहासकाराणाञ्च द्वारा औपनिवेशिकदृष्टिकोणेन कृतानां त्रटिपूर्णव्याख्यानानां सम्यग्रूपेण आलोचनपुरस्सरं पुनःशोधनम् ।
- सर्वविधशोधसम्बद्धानाम् उपक्रमाणां कार्यान्वयनाय सर्वेषु परिसरेषु सम्बद्धानुसन्धानसंस्थासु च शोधसम्बद्धानि सर्वाण्यपि कार्याणि समीक्षितुं प्रयागराजस्थगङ्गानाथझापरिसरस्य विशेषस्थितेः अवस्थापनम् ।
- सङ्कायसदस्येभ्यः आवश्यकतानुसारं प्रयोगशालोपकरणानां शोधपत्रिकाणां प्रचोदनाराशेश्चेत्यादीनां शोधार्थं सौविध्यप्रदानम्।
- शोधसंस्कृतिं प्रोत्साहयितुं वर्द्धयितुञ्च ( यथा –शिक्षणकार्यभारस्य न्यूनता, शोधसम्मेलनेषु भागग्रहणाय च) अवसरप्रदानादिकम् ।
- शिक्षाविद्भ्यः आवश्यकतानुसारं शोधार्थं सौविध्यप्रदानम्, यथा प्रयोगशाला, उपकरणानि, शोधप्रकाशनानि प्रचोदनाराशिश्चेति ।
- अन्यशोधसंघटनैः, उद्योगैः सह भागग्रहणमाध्यमेन शोधाय सङ्कायस्य प्रेरणम् ।
- मार्गदर्शकरूपेण कृतसेवस्य शोधस्याभिज्ञानाय उपयुक्तविधिस्थापनम् ।
- सङ्घटनानां विश्वविद्यालयानाञ्च वित्तपोषणं कृत्वा कतिपयानां शोधैककानाम् अथवा केन्द्राणां कृते सौविध्यप्रदानम्।
- कार्यशालाभिः, प्रशिक्षणसत्रैः जागरूकतावर्धकाभियानैश्च विश्वविद्यालये शोधसंस्कृतेः प्रोत्साहनम् ।
- शोधच्छात्राणां शोधकार्ये सहायतार्थं वित्तस्थापनम् ।

**अनुसन्धानस्य आचारसंहिता**

- कर्नाटकसंस्कृतविश्वविद्यालये शोधकर्तृभ्यः अपेक्षा क्रियते यत् ते स्वकीये शोधकार्ये सुस्पष्टतां प्रदर्शयेयुः . सुस्पष्टतायाः व्यवसायिकतायाश्च उच्चमानदण्डान् संरक्षयेयुः।
- कर्नाटकसंस्कृतविश्वविद्यालयः स्वत्वाधिकारचौर्यस्य अशिष्टतायाश्च सम्बन्धे विश्वविद्यालयानुदानायोगाधारितनियमान् पालयति । यथा च अशिष्टतायाः साहित्यिकचौर्यस्य च विषये परीक्षणाय आचारसंहितायां सुस्पष्टरूपेण उल्लिखितमस्ति ।
- विद्यावारिधिः (पी. एचडी.) विद्यावाचस्पतिः( डी.लिट्.) इत्युपाधीनां शोधप्रबन्धप्रस्तुतेः पूर्वं स्वत्वाधिकारचौर्यनिरीक्षणाय अन्यकदाचारनिरीक्षणाय च परिसरे शोधसम्बद्धसंस्थास्तरे च सम्बद्धव्यवसायिद्वारा शोधकार्यस्य निरीक्षणं करिष्यते । शोधप्रबन्धसमर्पणविषये प्रत्येकं छात्रः पूर्णतः स्वत्वाधिकारचौर्यपरीक्षणाय विश्वविद्यालयस्य परिसरेषु सम्बद्धसंस्थासु च केन्द्रीयशासनेन वित्तपोषितायाः परामृष्टायाः अनुशंसितायाश्च **'शोधशुद्धेः'** सौविध्यं प्राप्तुमर्हति ।

Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387

- **समीक्षणाय विशिष्टनिर्बन्धाः** – अनुचितशोधपद्धतिः,व्याकरणसम्बद्धदोषाः, स्पष्टीकरणाभावः / विवरणस्याल्पता, अनुचितानि उद्धरणानि अनुचितसन्दर्भादीनि अनुसन्धानसमितिद्वारा प्रदत्तनिर्देशानुसारं समीक्षितानि भविष्यन्ति।

**अस्वीकृतेः विशिष्टनिर्बन्धाः** - आचारसंहितोल्लङ्घनं कदाचारः साहित्यिकचौर्यं कृतस्य शोधस्य पुनरुत्पादनं निर्माणं वा मिथ्याकरणादिकम् अनुसन्धानसमितिद्वारा प्रदत्तनिर्देशानुसारेण अस्वीकृतेः कारणानि भविष्यन्ति।

**अनुसन्धानकदाचारः**

- अनुसन्धानकदाचारः अनुसन्धानाय आचारसंहितायाः कस्यापि नियमस्योल्लङ्घनरूपेण परिभाषितुं शक्यते । उत अनुसन्धानकदाचारः अनुसन्धानप्रस्तावे प्रदर्शने समीक्षणे अथवा शोधपरिणामानां प्रतिवेदने कपटप्रयुक्तत्वेन असत्यापादनत्वेन साहित्यिकचौर्यत्वेन चेत्यादिरूपेणापि परिभाषितुं शक्यते।
- कपटनिर्माणस्यार्थः दत्तांशानाम् अथवा परिणामानां निर्माणं तेषाम् अभिलेखनम् अथवा उपस्थापनम्।
- मिथ्याकरणस्यार्थो भवति अनुसन्धानसामग्रीषु उपकरणेषु प्रक्रियासु च इतस्ततःकरणम्, दत्तांशानां परिणामानां वा परिवर्तनं येन शोधकार्यस्य निरीक्षणे सुष्ठु प्रदर्शनं न भवेत्।
- साहित्यिकचौर्यम् इत्युक्ते इतरस्य विचाराणां कार्याणाञ्च स्वकीयत्वेन प्रचारः।
- अनुसन्धानकदाचारे दत्तांशानां व्याख्यायां निर्णये च व्यावसायिकवैभिन्यम् अनुद्दिष्टदोषा वा न गण्यन्ते । सन्देहदूरीकरणाय शोधकदाचारदूरीकरणाय च परिमर्षणस्य कृत्यानां योजनस्य कृत्यानां च सन्निवेशः वर्तते।

V. [signature]
Registrar
Karnataka Samskrit University
Pampa Mahakavi Road, Chamarajpet,
Bengaluru - 560018. Ph: 080-26705387